# ॥ वाल्मीकि रामायण ॥

## ३ अरण्यकाण्ड

## अध्याय ३२

ततः शूर्पणखां क्रुद्धां ब्रुवतीं परुषं वचः ।
अमात्यमध्ये सङ्क्रुद्धः परिपप्रच्छ रावणः ॥ १ ॥

कश्च रामः कथं वीर्यः किं रूपः किं पराक्रमः ।
किमर्थं दण्डकारण्यं प्रविष्टश्च सुदुश्चरम् ॥ २ ॥

आयुधं किं च रामस्य निहता येन राक्षसाः ।
खरश्च निहतं सङ्ख्ये दूषणस्त्रिशिरास्तथा ॥ ३ ॥

इत्युक्ता राक्षसेन्द्रेण राक्षसी क्रोधमूर्छिता ।
ततो रामं यथान्यायमाख्यातुमुपचक्रमे ॥ ४ ॥

दीर्घबाहुर्विशालाक्षश्चीरकृष्णाजिनाम्बरः ।
कन्दर्पसमरूपश्च रामो दशरथात्मजः ॥ ५ ॥

शक्रचापनिभं चापं विकृष्य कनकाङ्गदम् ।
दीप्तान्क्षिपति नाराचान्सर्पानिव महाविषान् ॥ ६ ॥

नाददानं शरान्घोरान्न मुञ्चन्तं महाबलम् ।
न कार्मुकं विकर्षन्तं रामं पश्यामि संयुगे ॥ ७ ॥

हन्यमानं तु तत्सैन्यं पश्यामि शरवृष्टिभिः ।
इन्द्रेणैवोत्तमं सस्यमाहतं त्वश्मवृष्टिभिः ॥ ८ ॥

रक्षसां भीमवीर्याणां सहस्राणि चतुर्दश ।
निहतानि शरैस्तीक्ष्णैस्तेनैकेन पदातिना ॥ ९ ॥

अर्धाधिकमुहूर्तेन खरश्च सहदूषणः ।
ऋषीणामभयं दत्तं कृतक्षेमाश्च दण्डकाः ॥ १० ॥

एका कथं चिन्मुक्ताहं परिभूय महात्मना ।
स्त्रीवधं शङ्कमानेन रामेण विदितात्मना ॥ ११ ॥

भ्राता चास्य महातेजा गुणतस्तुल्यविक्रमः ।
अनुरक्तश्च भक्तश्च लक्ष्मणो नाम वीर्यवान् ॥ १२ ॥

अमर्षी दुर्जयो जेता विक्रान्तो बुद्धिमान्बली ।
रामस्य दक्षिणे बाहुर्नित्यं प्राणो बहिष्चरः ॥ १३ ॥

रामस्य तु विशालाक्षी धर्मपत्नी यशस्विनी ।
सीता नाम वरारोहा वैदेही तनुमध्यमा ॥ १४ ॥

नैव देवी न गन्धर्वा न यक्षी न च किंनरी ।
तथारूपा मया नारी दृष्टपूर्वा महीतले ॥ १५ ॥

यस्य सीता भवेद्भार्या यं च हृष्टा परिष्वजेत् ।
अतिजीवेत्स सर्वेषु लोकेष्वपि पुरन्दरात् ॥ १६ ॥

सा सुशीला वपुःश्लाघ्या रूपेणाप्रतिमा भुवि ।
तवानुरूपा भार्या सा त्वं च तस्यास्तथा पतिः ॥ १७ ॥

तां तु विस्तीर्णजघनां पीनोत्तुङ्गपयोधराम् ।
भार्यार्थे तु तवानेतुमुद्यताहं वराननाम् ॥ १८ ॥

तां तु दृष्टवाद्य वैदेहीं पूर्णचन्द्रनिभाननाम् ।
मन्मथस्य शराणां च त्वं विधेयो भविष्यसि ॥ १९ ॥

यदि तस्यामभिप्रायो भार्यार्थे तव जायते ।
शीघ्रमुद्धियतां पादो जयार्थमिह दक्षिणः ॥ २० ॥

कुरु प्रियं तथा तेषां रक्षसां राक्षसेश्वर ।
वधात्तस्य नृशंसस्य रामस्याश्रमवासिनः ॥ २१ ॥

तं शरैर्निशितैर्हत्वा लक्ष्मणं च महारथम् ।
हतनाथां सुखं सीतां यथावदुपभोक्ष्यसे ॥ २२ ॥

रोचते यदि ते वाक्यं ममैतद्राक्षसेश्वर ।
क्रियतां निर्विशङ्केन वचनं मम राघव ॥ २३ ॥

निशम्य रामेण शरैरजिह्मगैर्
हताञ्जनस्थानगतान्निशाचरान् ।
खरं च बुद्धवा निहतं च दूषणं
त्वमद्य कृत्यं प्रतिपत्तुमर्हसि ॥ २४ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com